# MT

Seat No. | | | | | | | |

2018 .... .... 1100

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - VI**

**Time : 3 Hours** **(Pages 12)** **Marks : 100**

---

## प्रथमः विभागः - सुगमसंस्कृतम् ।

**प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** ४

| १ |  | २ |  | ३ |  | ४ | तिन्त्रिणी  | ५ |  |
|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | |

**प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २)** २

१. १२ - २. षष्टिः -

३. चतुरशीतिः -

**प्र.१ इ) स्तम्भमेलनं कुरुत ।** २

| | अ | ब |
|---|---|---|
| १. | दशोन-षड्वादनम् | ११:०० |
| २. | एकादशवादनम् | ३:१० |
| ३. | दशाधिक - त्रिवादनम् | ७:१५ |
| ४. | सपाद - सप्तवादनम् | ५:५० |

**प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २)** २

| ________ बुधवासरः | ← | परह्यः ________ | ← | ________ शुक्रवासरः | ← | अद्य शनिवासरः |
|---|---|---|---|---|---|---|

**प्र.१ उ) उदाहरणद्वयं लिखत। (६ तः ५)** ५

१. तालव्यौ -
२. संयुक्तस्वरौ -
३. ऋकारान्तस्य -
४. पुल्लिङ्गस्य -
५. प्रथमगणस्य धातू -
६. चतुर्थगणस्य धातू -

## द्वितीयः विभागः - गद्यम्।

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

द्वितीयः प्रसङ्गः। यस्माद् ज्ञानं लभते स गुरुः।

एकस्मिन् दिने आचार्यः शिष्यगणेन सह गङ्गास्नानार्थम् अगच्छत्। तदा मार्गे कोऽपि दरिद्रः मलिनकायः, जीर्णवस्त्रधारी मनुष्यः तस्य पुरतः आगच्छत्। तं दृष्ट्वा शिष्याः तम् 'अपसर, अपसर' इति उच्चैः अवदन्।

सः मनुष्यः अपृच्छत् - ''अपसर, अपसर इति कं वदसि ? शरीरं वा आत्मानं वा ? आत्मा तु परमेश्वरस्य अंशः अतः सर्वेषां समानः एव। तथा च सर्वेषां शरीराणि पञ्चमहाभूतात्मकानि। तर्हि कथं तव शरीरं मम शरीराद् भिन्नम्, अहं च त्वद् भिन्नः ?'' वेदान्ततत्त्वस्य सारं तस्य मुखात् श्रुत्वा आचार्यः तं प्रणनाम। ज्ञानं तु कस्मादपि ग्राह्यम्। यस्माद् ज्ञानं लभते स गुरुरेव इति विचारेण आचार्यः तत्रैव 'मनीषापञ्चकम्' इति स्तोत्रं रचितवान्।

एवम् आसेतुहिमाचलं पर्यटन् अद्वैत-सिद्धान्तस्य प्रचारम् अकरोत् सः।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्॥

१. **अवबोधनम्। (४ तः ३)**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** १

शङ्करः मलिनकायं मनुष्यं प्रणनाम यतः .......

(अ) मलिनकायः मनुष्यः शङ्करं सङ्कटात् अरक्षत्।

(ब) सः मनिलकायः मनुष्यः वेदान्तस्य सारं जानाति स्म।

**ख) कः कं वदति।** १

'अपसर, अपसर !'

ग) **पूर्णवाक्येन उत्तरं लिखत ।** १
शङ्कराचार्यः आसेतुहिमाचलं पर्यटन् किम् अकरोत ?

घ) **एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

२. **शब्दज्ञानम् । (३ तः २)**
क) **गद्यांशतः पञ्चमी-विभक्त्यन्तपदे चित्वा लिखत ।** १

ख) **प्रश्ननिर्माणं कुरुत ।** १
आचार्यः षोडशे भाष्यं कृतवान् ।

ग) **सन्धिविग्रहं कुरुत ।** १
गुरुरेव - ....... + ....... ।

३. **पृथक्करणम् ।** २
**क्रमेण योजयत ।**
(१) मार्गे मलिनकायपुरुषस्य आगमनम् ।
(२) शिष्यगणेन सह गङ्गास्थानार्थं गमनम् ।
(३) 'मनीषापञ्चकम्' इति स्तोत्रस्य रचना ।
(४) मलिनकायपुरुषस्य मुखात् वेदान्ततत्त्वसारस्य श्रवणम् ।

प्र.२ **आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

| | | |
|---|---|---|
| महोदयः | - | अपि भवती संस्कृतं पाठयति ? |
| महोदया | - | (सस्मितं) न खलु । |
| महोदयः | - | भवत्याः समीपे एतं सुभाषितसङ्ग्रहं दृष्ट्वा मया एवं चिन्तितम् । |
| महोदया | - | ओह् ! यद्यपि संस्कृतं न पाठयामि तथापि अस्य पुस्तकस्य मम कार्यक्षेत्रेण सह सम्बन्धः अस्ति । |
| महोदयः | - | एवम् । कस्मिन् क्षेत्रे कार्यरता भवती ? |
| महोदया | - | अहं व्यवस्थापनप्रशिक्षिकारूपेण कार्यं करोमि । मया अवगतं यद् रामायण-महाभारत-किरातार्जुनीय-रघुवंश- इत्यादिषु बहवः श्लोकाः सन्ति येषु व्यवस्थापनशास्त्रस्य मूलतत्त्वानि दृष्टान्तसहितानि निर्दिष्टानि । अनेन काव्यमाध्यमेन विषयप्रवेशः सुगमः भवति । एषा पद्धतिः मया स्वीकृता जनैरपि अभिमता । अतः मया पुनरेकवारं संस्कृतभाषायाः संस्कृतकाव्यादीनां च अध्ययनं प्रारब्धम् । |
| महोदयः | - | अहो आश्चर्यम् ! शालायाः अनन्तरं खण्डितं मम संस्कृताध्ययनम् । तदपि अधुनैव पुनः आरब्धम् । |
| महोदया | - | कथं कथम् ? |

| | |
|---|---|
| महोदयः - | वस्तुतः अहं वाणिज्यशाखायाः स्नातकः । विधिशाखायाः पदवी अपि प्राप्ता मया । साम्प्रतं बहुराष्ट्रियसंस्थायां विधिविमर्शकरूपेण कार्यं करोमि। तदनुसृत्य कौटिलीयम् अर्थशास्त्रं, याज्ञवल्क्यस्मृतिः आदीनां ग्रन्थानाम् अध्ययनं साहाय्यकरं भवेत् इति गुरुभिः उक्तम् । अतः अधुना अहं शास्त्रविषयकाणां संस्कृतग्रन्थानाम् अध्ययने यत्नं करोमि । (स्यूतात् किमपि संस्कृतपुस्तकं दर्शयति।) |

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

(१) ........... समीपे सुभाषितसङ्ग्रहं दृष्ट्वा मया चिन्तितम् । (भवत्यै / भवत्याः)

(२) ......... अवगतम् । (मयाः / अहम्)

**ख) पूर्णवाक्येन उत्तरत ।** १

केन माध्यमेन विषयप्रवेशः सुगमः भवति ?

**ग) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

महोदयः विधिविमर्शकरूपेण कार्यं करोति ।

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

**२. शब्दज्ञानम् । (३ तः २)**

**क) चतुर्थपदं लिखत ।** १

(१) बहवः : श्लोकाः :: शास्त्रविषयकान् : __________

(२) एका : महिला :: सुगमः : __________

**ख) सन्धिविग्रहं कुरुत ।** १

अधुनैव - ....... + ....... ।

**ग) लकारं लिखत ।** १

ग्रन्थानाम् अध्ययनं साहाय्यकरं <u>भवेत्</u> ।

३. **जालरेखाचित्रं पूरयत ।** २




**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१.

(रङ्गमञ्चे - कीर्तनकारः कीर्तनं करोति, श्रोतृवृन्दः श्रवणे मग्नः ।)

कीर्तनकारः - गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि पृथिव्यां सन्निधिं कुरु ।।
ज्येष्ठमासे शुक्लपक्षे दशम्यां तिथौ गङ्गादशहरापर्वप्रारम्भः । अस्मिन् पर्वणि नदीपूजनं कर्तव्यम् ।

श्रोतृवृन्दः - नदीपूजनम् ? किमर्थं नदीपूजनम् ?

२.

(ततः प्रविशति विश्वामित्रः । नदीं प्रणम्य...)

विश्वामित्रः - कथं लङ्घनीयः प्रवाहो नदीनाम्, कथं रक्षितव्यं जनं गोधनं च ।।
कथं याचितव्यस्तरणाय मार्गः, कथं प्रार्थनीया शुभेच्छा नदीनाम् ।।

नदी (विपाट्)- कः खलु एषः मानवः ? अस्मान् किमर्थं वन्दते स्तौति च ? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति ?

विश्वामित्रः - अयि मातः, विश्वामित्रोऽहम् । दूरतः आयातः रथैः शकटैः च । वयं सर्वे परतीरं गन्तुं समुत्सुकाः ।

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (३ तः २)** ४

१) सर्कसस्वामी किमर्थं चिमणरावं प्रति आगतः ?

२) ज्ञानग्रहणविषये शङ्कराचार्याणां किं मतम् ?

३) संस्कृताध्ययनम् अन्यक्षेत्रेषु कथम् उपयुक्तम् ?

## तृतीयः विभागः - पद्यम् ।

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवोऽपि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।
वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
तथाप्यादाय वैदेहीं कुशली न गमिष्यसि ।।

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

कवि : कं 'मित्र' इति सम्बोधयति ?

**ख) मेलनं कुरुत ।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| बहवः | वचः |
| दीनम् | चातकः |
| | अम्भोदाः |

**ग) रेखाचित्रं पूरयत ।** २




**प्र.३ आ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

रामाभिषेके जलमाहरन्त्या हस्तात् सृतो हेमघटो युवत्याः ।
सोपानमार्गेण करोति शब्दं ठंठं ठठं ठं ठठठं ठठं ठः ।।
तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ।
निरैक्षद् रावणं क्षिप्रं वैदेहीं च ददर्श सः ।।

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

कस्याः हस्तात् सुवर्णघटः पतितः ?

**ख) सन्धिविग्रहं कुरुत ।** १

जटायुरथ - ............... + ............... ।

**ग) माध्यमभाषया उत्तरं लिखत ।** २

१) 'कं संजघान' इति श्लोकं स्पष्टीकुरुत ।

२) 'रे रे चातक' इति श्लोकं स्पष्टीकुरुत ।

**प्र.३ इ) पद्ये शुद्धे पूर्णे च लिखत । (क - ख तः १ तथा ग - घ तः १)** ६

१. **क.** अयं ............... वा ॥

**ख.** कं ............... शीतम् ॥

२. **ग.** वैद्यराज ............... च ॥

**घ.** राक्षसेभ्यः ............... पण्डितः ॥

**प्र.३ ई) माध्यमभाषया सरलार्थं लिखत। (४ तः ३)** ६

१. यथैव सकला नद्यः प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ॥

२. सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ॥

३. सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम्।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ॥

४. षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ॥

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र. ४ अ) वाक्यरचनां कुरुत ।**

**क) धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (५ तः ३)** ३

१. स्निह् →

२. पत् →

३. दा-यच्छ् →

४. गम्-गच्छ् →

५. स्पृह् →

**ख) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

१. विद्या एव <u>धनम्</u> ।

२. कृष्णः <u>मेघः</u> जलं वर्षति ।

३. <u>जलम्</u> एव जीवनम् ।

४. <u>नरः</u> सर्वदा सत्यं वदेत् ।

**प्र.४ आ) ५ / ७ वाक्यात्मकं निबन्धं अथवा संवादं लिखत । (३ तः१)** ५

(१) मम प्रियं पुस्तकम् (२) भारतीयं प्रसिद्धं स्थलम् (३) मम प्रिया भाषा

**अथवा**

(१) आपणसंवादः (२) रुग्णालयसंवादः (३) दूरवाणीसंवादः

**प्र.४ इ) निर्दिष्टां कृतीं कुरुत ।**

**मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत ।** ५




(**मञ्जूषा** : नयति, कर्तयति, खादति, भषति, दोग्धि, धारयति, उड्डयते,चलति, रचयति, पूरयति)

**अथवा**

**प्र.४ इ) संस्कृतानुवादं कुरुत । (८ तः ५)**

१. Give me eraser.

२. There are note-books in the bag.

३. Lord Ganesha likes shoe-flower.

४. Rangoli is seen in front of house.

५. Mother rolls the chapati.

६. Tailor sews the shirt.

७. Gardner collects flowers.

८. Sunita smells rose.

## पञ्चमः विभागः - भाषाभ्यासः ।

**प्र.५ अ) तालिकापूर्तिं कुरुत ।**

**१. नामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| रवौ | ............ | ............ | सप्तमी |
| वस्तुना | ............ | ............ | तृतीया |
| ............ | ............ | शशिनः | द्वितीया |

**२. सर्वनामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ............ | याभ्याम् | ............ | पञ्चमी |
| भवतः | ............ | ............ | षष्ठी |
| ............ | ............ | एताभ्यः | चतुर्थी |

**३. क्रियापदतालिका । (६ तः ४)** २

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|---|
| लङ् | ............ | अजीवताम् | ............ | प्रथमः पुरुषः |
| लोट् | कुरु | ............ | ............ | मध्यमः पुरुषः |
| लट् | ............ | ............ | मन्यामहे | उत्तमः पुरुषः |

**४. धातुसाधित-विशेषण- तालिका । (६ तः ४)** २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| दृश्-पश्य् (९ उ.प.) | ............ | दृष्टवान् | दृश्यः | ............ |
| आ+रभ् (१ आ.प.) | ............ | आरब्धवान् | ............ | आरभमाणः |
| कृ (८ उ. प.) | कृतः | ............ | कर्तव्यः | ............ |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

**१) योग्यपर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । (५ तः ३)** ३

१. ............ भवने योगेशः निवसति । (द्वितीयम् / द्वितीये)

२. दिनस्य ............ लोकयानम् आगच्छति । (नवदश / नववारम्)

३. ............ वेदाः वर्तन्ते । (चतुरः / चत्वारः)

४. ............ महिलाः गृहं गच्छन्ति । (तिस्रः / त्रीणि)

५. तेन ............ प्रयोगः कृतः । (त्रिः / त्रयः)

**२) समासानां तालिकापूर्तिं कुरुत । (५ तः ३)** ३

| | समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|---|
| १. | शुकसारिकाः | शुकाः च सारिकाः च । | ............ |
| २. | कणादमुनिः | ............ | कर्मधारय समास |
| ३. | सविनयम् | विनयेन सह । | ............ |
| ४. | हस्तस्थम् | हस्ते तिष्ठति इति । | ............ |
| ५. | चिन्ताकुलः | ............ | तृतीया तत्पुरुष समास |

**३) समानार्थकशब्दान् / विरुद्धार्थकशब्दान् लिखत । (५ तः ३)** ३

१. सुगमः -
२. पुरतः ×
३. बलवान् ×
४. नदी -
५. भाषा -

**४) सूचनानुसारं कृतीः कुरुत । (५ तः ३)** ३

क. पदवी अपि प्राप्ता मया । (वाच्यपरिवर्तनं कुरुत ।)
ख. सः महोदयम् उपगम्य वदति । (पूर्वकालवाचकं निष्कासयत ।)
ग. आचार्यः शिष्यगणेन सह गङ्गास्नानार्थं गच्छति स्म । ('स्म' निष्कासयत ।)
घ. अपि भवती संस्कृतं पाठयति ? ('भवती' स्थाने 'त्वं' योजयत ।)
ङ. वैद्यः प्राणान् हरति । (लङ्लकारे परिवर्तयत ।)

**५) वाक्यं शुद्धं कुरुत । (५ तः ३)** ३

१. नदी वेगेन <u>वहन्ति</u> ।
२. <u>सूर्यात्</u> अभितः ग्रहाः परिभ्रमन्ति ।
३. <u>निर्धनः</u> पुरुषं तु मित्राणि अपि त्यजन्ति ।
४. <u>गृहस्य</u> बहिः वृक्षः अस्ति ।
५. <u>सा</u> नृत्यं करोमि ।

## षष्ठः विभागः - अपठितम् ।

**प्र.६ अ) गद्यांशं पठित्वा कृतीः कुरुत ।**

| |
|---|
| वाल्मीकिना रचितं रामायणं व्यासेन रचितं महाभारतं च सर्वान् मोहयतः। यथा माघः, भारविः, बाणः इत्यादयः कवयः प्रसिद्धाः, तथा कालिदासः, भासः, विशाखदत्तः, शूद्रकः, भवभूतिः इत्यादयः नाटककाराः प्रसिद्धाः। भास्कराचार्येण गणितशास्त्रं, पाणिनिना व्याकरणशास्त्रं, सुश्रुतेन वाग्भटेन च वैद्यकशास्त्रं, नैकैः तत्त्वज्ञैः भारतीयतत्त्वज्ञानं विशदीकृतम्। सुभाषितं नाम शोभनं भाषितम्। 'अमित्रस्य कुतः सुखम्', 'विद्याधनं सर्वधनप्रधानम्', 'हस्तस्य भूषणं दानम्' इत्यादीनि सुभाषितानि जनान् सदैव उपदिशन्ति। संस्कृतभाषायाः शब्दभाण्डारम् अतीव समृद्धं सम्पन्नं च वर्तते। 'नृपः' इति एकस्य शब्दस्य कृते भूपतिः, महीपतिः, पार्थिवः इत्यादयः बहवः शब्दाः वर्तन्ते। |

**१) एकवाक्येन उत्तरं लिखत ।** १

संस्कृते के कवयः प्रसिद्धाः?

**२) प्रातिपदिकं लिखत ।** १

१) वाल्मीकिना - ...............

२) शास्त्राणि - ...............

**३) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत ।** १

भास्कराचार्येण भारतीयतत्त्वज्ञानं विशदीकृतम् ।

**४) माध्यमभाषया सरलार्थं लिखत ।** १

संस्कृतभाषायाः शब्दभाण्डारम् अतीव समृद्धं सम्पन्नं च वर्तते ।

**५) गद्यांशात् तृतीयान्तपदानि चित्वा लिखत ।** १

**६) कारकपरिचयं कुरुत ।** १

व्यासः <u>महाभारतम्</u> अरचयत् ।

**प्र.६ आ) - १) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

| |
|---|
| दिनान्ते च पिबेत् दुग्धं, निशान्ते च पिबेत् जलम्।<br>भोजनान्ते पिबेत् तक्रं, किं वैद्यस्य प्रयोजनम्।। |

**क) एकवाक्येन उत्तरत । (२ तः १)** १

(१) दिनान्ते किं पिबेत् ?

(२) निशान्ते किं पिबेत् ?

**ख) समानार्थकशब्दं लिखत ।** १

जलम् -

**प्र.६ आ) - २) जालचित्रं पूरयत ।** २




## शुभं भवतु